# Atma-Vidya-Vilasa

# આત્મવિદ્યાવિલાસઃ

## Document Information

Text title : Atma-Vidya-Vilasa 1

File name : AtmavidyAvilAsa.itx

Category : major_works, sadAshivabrahmendra

Location : doc_z_misc_major_works

Author : Sadashivendra Sarasvati

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, kalyana krrit kalyanakrrit at gmail.com

Description-comments : on advaitic life

Source : Sivayogadipika of Sadasivayogisvara with Atmavidyavilasa (Anandashram)

Latest update : August 25, 2007, October 6, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# આત્મવિદ્યાવિલાસઃ

શ્રીસદાશિવેન્દ્રસરસ્વતીવિરચિતઃ

અથ આત્મવિદ્યાવિલાસઃ ।

ચિન્મુદ્રિતકરકમલં ચિન્તિતભક્તેષ્ટદં વિમલમ્ ।
ગુરુવરમાદ્યં કઞ્ચન નિરવધિકાનન્દનિર્ભરં વન્દે ॥

વટતરુનિકટનિવાસં પટુતરવિજ્ઞાનમુદ્રિતકરાબ્જમ્ ।
કઞ્ચન દેશિકમાદ્યં કૈવલ્યાનન્દકન્દલં વન્દે ॥ ૧॥

નિરવધિસંસૃતિનીરધિનિપતિતજનતારણસ્ફુરન્નૌકામ્ ।
પરમતભેદનઘુટિકાં પરમશિવેન્દ્રાર્યપાદુકાં નૌમિ ॥ ૨॥

દેશિકપરમશિવેન્દ્રાદેશવશોદ્બુદ્ધદિવ્યમહિમાઽહમ્ ।
સ્વાત્મનિ વિશ્રાન્તિકૃતે સરસં પ્રસ્તૌમિ કિઞ્ચિદિદમ્ ॥ ૩॥

નિરુપમનિત્યનિરીહો નિષ્કલનિર્માયનિર્ગુણાકારઃ ।
વિગલિતસર્વવિકલ્પઃ શુદ્ધો બુદ્ધશ્ચકાસ્તિ પરમાત્મા ॥ ૪॥

સ્વાવિદ્યૈકનિબદ્ધઃ કુર્વન્કર્માણિ મુહ્યમાનઃ સન્ ।
દૈવાદ્વિધૂતબન્ધઃ સ્વાત્મજ્ઞાનાન્મુનિર્જયતિ ॥ ૫॥

માયાવશેન સુપ્તો મધ્યે પશ્યન્સહસ્રશઃ સ્વપ્નાન્ ।
દેશિકવચઃપ્રબુદ્ધો દીવ્યત્યાનન્દવારિધૌ કોઽપિ ॥ ૬॥

પ્રાકૃતભાવમપાસ્ય સ્વીકૃતનિજરૂપસચ્ચિદાનન્દઃ ।
ગુરુવરકરુણાપાઙ્ગાદ્ગૌરવમાસાદ્ય માદ્યતિ પ્રાજ્ઞઃ ॥ ૭॥

શ્રીગુરુકૃપયા સચ્ચિત્સુખનિજરૂપે નિમગ્નધીર્મૌની ।
વિહરતિ કશ્ચન વિબુધઃ શાન્તાહન્તો નિતાન્તમુદિતાન્તઃ ॥ ૮॥

ગુરુવરકરુણાલહરીવ્યતિકરભરશીતલસ્વાન્તઃ ।
રમતે યતિવર એકો નિરુપમસુખસીમનિ સ્વૈરમ્ ॥ ૯॥

શ્રીદેશિકવરકરુણારવિકરસમપોહિતાન્તરધ્વાન્તઃ ।
વિહરન્મસ્કરિવર્યો નિરવધિકાનન્દનીરધાવાસ્તે ॥ ૧૦॥

જનિવિપરીતક્રમતો બુદ્ધ્યા પ્રવિલાપ્ય પઞ્ચભૂતાનિ ।
પરિશિષ્ટમાત્મતત્ત્વં પશ્યન્નાસ્તે મુનિઃ શાન્તઃ ॥ ૧૧॥

જગદખિલમિદમસારં માયિકમેવેતિ મનસિ મન્વાનઃ ।
પર્યટતિ પાટિતાશઃ પ્રગલિતમદમાનમત્સરઃ કોઽપિ ॥ ૧૨॥

નાત્મનિ કિઞ્ચિન્માયા તત્કાર્યં વાઽસ્તિ વસ્તુતો વિમલે ।
ઇતિ નિશ્ચયવાનન્તઃ હૃષ્યત્યાનન્દનિર્ભરો યોગી ॥ ૧૩॥

ત્વમહમભિમાનહીનો મોદિતનાનાજનાચારઃ ।
વિહરતિ બાલવદેકો વિમલસુખામ્ભોનિધૌ મગ્નઃ ॥ ૧૪॥

અવધૂતકર્મજાલો જડબધિરાન્ધોપમઃ કોઽપિ ।
આત્મારામો યતિરાડટવીકોણેષ્વટન્નાસ્તે ॥ ૧૫॥

શાન્ત્યા દૃઢોપગૂઢઃ શાન્તસમસ્તાન્યવેદનોદારઃ ।
રમતે રસજ્ઞ એકો રમ્યે સ્વાનન્દપર્યઙ્કે ॥ ૧૬॥

ઉન્મૂલિતવિષયારિઃ સ્વીકૃતવૈરાગ્યસર્વસ્વઃ ।
સ્વાત્માનન્દમહિમ્નિ સ્વારાજ્યેઽસ્મિન્ વિરાજતે યતિરાટ્ ॥ ૧૭॥

સવિતર્યપિ શીતરુચૌ ચન્દ્રે તીક્ષ્ણેઽપ્યધો વહત્યગ્નૌ ।
માયિકમિદમિતિ જાનઞ્જીવન્મુક્તો ન વિસ્મયી ભવતિ ॥ ૧૮॥

અજ્ઞાનવૈરિવિજયી પ્રજ્ઞામાતઙ્ગમસ્તકારૂઢઃ ।
વિહરતિ સંયમિરાજઃ સમરસસુખધામ્નિ સર્વતો રમ્યે ॥ ૧૯॥

શાન્તાહંકૃતિદોષઃ સુસમાહિતમાનસઃ કોઽપિ ।
પૂર્ણેન્દુશિશિરભાવો રાજત્યાનન્દસત્યચિદ્રસિકઃ ॥ ૨૦॥

તિષ્ઠન્પરત્ર ધામ્નિ સ્વીયસુખાસ્વાદપરવશઃ કશ્ચિત્ ।
ક્વાપિ ધ્યાયતિ કુહચિદ્ગાયતિ કુત્રાપિ નૃત્યતિ સ્વૈરમ્ ॥ ૨૧॥

અગૃહીતાઘકલઙ્કઃ પ્રશમિતસઙ્કલ્પવિભ્રમઃ પ્રાજ્ઞઃ ।
ન્યક્કૃતકાર્યકલાપસ્તિષ્ઠત્યાપૂર્ણસીમનિ ક્વાપિ ॥ ૨૨॥

ચપલં મનકુરઙ્ગં ચારુ ગૃહીત્વા વિમર્શવાગુરયા ।
નિગમારણ્યવિહારશ્રાન્તઃ શેતે સ્વધામ્નિ કોઽપ્યેકઃ ॥ ૨૩॥

દારુણચિત્તવ્યાઘ્રં ધીરમનઃખડ્ગધારયા હત્વા ।
અભયારણ્યે કોઽપિ સ્વૈરવિહારી જયત્યેકઃ ॥ ૨૪॥

સજ્જનહૃદયસરોજોન્મીલનકરધીકરપ્રસરઃ ।
એકો યતિવરપૂષા નિર્દોષશ્ચરતિ ચિદ્ગગને ॥ ૨૫॥

કુવલયવિકાસકારણમજ્ઞાનધ્વાન્તકૌમુદીપ્રજ્ઞઃ ।
શુદ્ધો મુનીન્દ્રચન્દ્રઃ સુરસેવ્યે લસતિ વિષ્ણુપદે ॥ ૨૬॥

સ્વાનન્દામૃતસેકૈરાન્તરસંતાપસંતતિં શમયન્ ।
ચિત્રમચઞ્ચલવૃત્તિશ્ચિદ્વ્યોમનિ ભાતિ યોગિવર્યઘનઃ ॥ ૨૭॥

સુમનઃસૌરભમઞ્જુલસઞ્ચારનિવારિતાખિલશ્રાન્તિઃ ।
સંયમિચારુસમીરો વિહરત્યાનન્દસંવિદારામે ॥ ૨૮॥

નિઃશ્રેયસસરસફલે નિર્મલવિજ્ઞાનપલ્લવમનોજ્ઞે ।
વીતભયે વિપિનતલે યતિશિતિકણ્ઠો વિભાતિ કોઽપ્યેકઃ ॥ ૨૯॥

નિઃસારભુવનમરુતલમુત્સાર્યાનન્દસારરસપૂર્ણે ।
વરસરસિ ચિન્મયેઽસ્મિન્પરહંસઃ કોઽપિ દીવ્યતિ સ્વૈરમ્ ॥ ૩૦ ।
નિખિલાગમપલ્લવિતે નિગમશિરસ્તન્ત્રશીતલોદ્યાને ।
મધુરતરમઞ્જુવાચઃ કૂજન્નાસ્તે યતીદ્રકલકણ્ઠઃ ॥ ૩૧॥

દારિતમોહમદેભો દૂરીકૃતસકલદુરિતશાર્દૂલઃ ।
વિબુધોત્તમસિંહવરો વિહરત્યાનન્દવિતતકાન્તારે ॥ ૩૨॥

અજ્ઞાનમૃગવરોજ્ઝિતવિજ્ઞાનોત્તુઙ્ગશ ૃઙ્ગશિખરિતલે ।
મતિસલિલશીતલાઙ્ગો યતિમદકલભો વિરાજતે વિહરન્ ॥ ૩૩॥

નાસાઞ્ચલનિહિતાક્ષો નામાદિભ્યો નિવર્તિતસ્વાન્તઃ ।
તટિનીતટેષુ તત્ત્વં ધ્યાયન્નાસ્તે યતિઃ કોઽપિ ॥ ૩૪॥

આશાવસનો મૌની નૈરાશ્યાલઙ્કૃતઃ શાન્તઃ ।
કરતલભિક્ષાપાત્રસ્તરુતલનિલયો મુનિર્જયતિ ॥ ૩૫॥

વિજનનદીકુઞ્જગૃહે મઞ્જુલપુલિનૈકમઞ્જુતરતલ્પે ।
શેતે કોઽપિ યતીન્દ્રઃ સમરસસુખબોધવસ્તુનિસ્તન્દ્રઃ ॥ ૩૬॥

ભૂતલમૃદુતરશય્યઃ શીતલવાતૈકચામરઃ શાન્તઃ ।

રાકાહિમકરદીપો રાજતિ યતિરાજશેખરઃ કોઽપિ ॥ ૩૭॥

વિપુલશિલાતલફલકે વિમલસરિદ્વારિપરિવૃતોદારે ।
મન્દં મલયજપવને વાતિ પ્રસ્વપિતિ કોઽપિ યતિરાજઃ ॥ ૩૮॥

આન્તરમેકં કિઞ્ચિત્સન્તતમનુસન્દધન્મહામૌની ।
કરપુટભિક્ષામશ્નન્નટતિ હિ વીથ્યાં જડાકૃતિઃ કોઽપિ ॥ ૩૯॥

પ્રવિલાપ્ય જગદશેષં પરિશિષ્ટાખણ્ડવસ્તુપરતન્ત્રઃ ।
પ્રાશ્નાતિ કવલમાસ્યે પ્રાપ્તં પ્રારબ્ધકર્મણા કોઽપિ ॥ ૪૦॥

નિન્દતિ કિમપિ ન યોગી નન્દતિ નૈવાપરં કિમપ્યન્તઃ ।
ચન્દનશીતલહૃદયઃ કન્દલિતાનન્દમન્થરઃ સ્વાસ્તે ॥ ૪૧॥

સન્ત્યજ્ય શાસ્ત્રજાલં સંવ્યવહારં ચ સર્વતસ્ત્યક્ત્વા ।
આશ્રિત્ય પૂર્ણપદવીમાસ્તે નિષ્કમ્પદીપવદ્યોગી ॥ ૪૨॥

તૃણપઙ્ચર્ચિતાઙ્ગસ્તૃણમિવ વિશ્વં વિલોકયન્યોગી ।
વિહરતિ રહસિ વનાન્તે વિજરામરભૂમ્નિ વિશ્રાન્તઃ ॥ ૪૩॥

પશ્યતિ કિમપિ ન રૂપં ન વદતિ ન શ઼ૃણોતિ કિઞ્ચિદપિ વચનમ્ ।
તિષ્ઠતિ નિરુપમભૂમનિ નિષ્ઠામવલમ્બ્ય કાષ્ઠવદ્યોગી ॥ ૪૪॥

જાત્યભિમાનવિહીનો જન્તુષુ સર્વત્ર પૂર્ણતાં પશ્યન્ ।
ગૂઢં ચરતિ યતીન્દ્રો મૂઢવદખિલાગમાર્થતત્ત્વજ્ઞઃ ॥ ૪૫॥

ઉપધાય બાહુમૂલં પરિધાયાકાશમવનિમાસ્તીર્ય ।
પ્રસ્વપિતિ વિરતિવનિતાં પરિરભ્યાનન્દપરવશઃ કોઽપિ ॥ ૪૬॥

ગતભેદવાસનાભિઃ સ્વપ્રજ્ઞોદારવારનારીભિઃ ।
રમતે સહ યતિરાજસ્ત્રય્યન્તાન્તઃપુરે કોઽપિ ॥ ૪૭॥

વૈરાગ્યવિપુલમાર્ગં વિજ્ઞાનોદ્દામદીપિકોદ્દીપ્તમ્ ।
આરુહ્ય તત્ત્વહર્મ્યં મુક્ત્યા સહ મોદતે યતિરાટ્ ॥ ૪૮॥

વિજનતલોત્પલમાલાં વનિતાવૈતૃષ્ણ્યકલ્પવલ્લીં ચ ।
અપમાનામૃતગુટિકામાત્મજ્ઞઃ કોઽપિ ગૃહ્ણાતિ ॥ ૪૯॥

ન નિષેધતિ દોષધિયા ગુણબુદ્ધ્યા વા ન કિઞ્ચિદાદત્તે ।
આવિદ્યકમખિલમિતિ જ્ઞાત્વોદાસ્તે મુનિઃ કોઽપિ ॥ ૫૦॥

ભૂતં કિમપિ ન મનુતે ભાવિ ચ કિઞ્ચિન્ન ચિન્તયત્યન્તઃ ।
પશ્યતિ ન પુરોવર્ત્યપિ વસ્તુ સમસ્તાર્થસમરસઃ કોઽપિ ॥ ૫૧॥

નિગૃહીતાખિલકરણો નિર્મૃષ્ટાશેષવિષયેહઃ ।
તૃપ્તિમનુત્તમસીમાં પ્રાપ્તઃ પર્યટતિ કોઽપિ યતિવર્યઃ ॥ ૫૨॥

સન્ત્યજતિ નોપપન્નં નાસમ્પન્નં ચ વાઞ્છતિ ક્વાપિ ।
સ્વસ્થઃ શેતે યતિરાડાન્તરમાનન્દમનુભવન્નેકઃ ॥ ૫૩॥

કામપિ વિમલાં પદવીમાસાદ્યાનન્દસંવિદુન્નિદ્રામ્ ।
આસ્તે ભિક્ષુક એકો વિહરન્નિર્મુક્તબન્ધનઃ સ્વૈરમ્ ॥ ૫૪॥

વસ્તુન્યસ્તમિતાખિલવિશ્વવિહારે વિલીનમનાઃ ।
રાજતિ પરાનપેક્ષો રાજાઽખિલવીતરાગાણામ્ ॥ ૫૫॥

આચાર્યાપાઙ્ગદૃશા સમવાપ્તાપારસંવિદાકારઃ ।
પ્રશમિતસકલવિભેદઃ પરહંસઃ કશ્ચિદાભાતિ ॥ ૫૬॥

વર્ણાશ્રમવ્યવસ્થામુત્તીર્ય વિધૂય વિદ્યાદીન્ ।
પરિશિષ્યતે યતીન્દ્રઃ પરિપૂર્ણાનન્દબોધમાત્રેણ ॥ ૫૭॥

ક્ષયમુપનીય સમસ્તં કર્મ પ્રારબ્ધમુપભુજ્ય ।
પ્રવિગલિતદેહબન્ધઃ પ્રાજ્ઞો બ્રહ્મૈવ કેવલં ભવતિ ॥ ૫૮॥

સ્તિમિતમનન્તમનાદ્યં સન્તતમાનન્દબોધઘનમ્ ।
અવિકલ્પમાદ્યમેકં સન્માત્રં વિદ્યતે કિમપિ ॥ ૫૯॥

અક્ષરમજરમજાતં સૂક્ષ્મતરાપૂર્વશુદ્ધવિજ્ઞાનમ્ ।
પ્રગલિતસર્વક્લેશં પરતત્ત્વં વર્તતે કિમપિ ॥ ૬૦॥

સુખતરમમરમદૂરં સારં સંસારવારિધેસ્તીરમ્ ।
સમરસમભયમપારં તત્કિઞ્ચન વિદ્યતે તત્ત્વમ્ ॥ ૬૧॥

અરસમગન્ધમરૂપં વિરજસ્કમસત્ત્વમતમસ્કમ્ ।
નિરુપમનિર્ભયતત્ત્વં તત્કિમપિ દ્યોતતે નિત્યમ્ ॥ ૬૨॥

ઇતિ ગુરુકરુણાપાઙ્ગાદાર્યાભિર્દ્વ્યધિકષષ્ટિસઙ્ખ્યાભિઃ ।
નિરવદ્યાભિરવોચં નિગમશિરસ્તન્ત્રસારભૂતાર્થમ્ ॥ ૬૩॥

ગદિતમિમમાત્મવિદ્યાવિલાસમનુવાસરં સ્મરન્વિબુધઃ ।
પરિણતપરાત્મવિદ્યઃ પ્રપદ્યતે સપદિ પરમાર્થમ્ ॥ ૬૪॥

પરમશિવેન્દ્રશ્રીગુરુશિષ્યેણેત્થં સદાશિવેન્દ્રેણ ।
રચિતેયમાત્મવિદ્યાવિલાસનામ્ની કૃતિઃ પૂર્ણા ॥ ૬૫॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્ય-
શ્રીપરમશિવેન્દ્રસરસ્વતીપાદાબ્જસેવાપરાયણ-
શ્રીસદાશિવેન્દ્રસરસ્વત્યા વિરચિતઃ
આત્મવિદ્યાવિલાસઃ સમાપ્તઃ ॥

Encoded by Sunder Hattangadi
Proofread by Sunder Hattangadi, kalyana krrit kalyanakrrit at gmail.com

*Atma-Vidya-Vilasa*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*